# Rakini Radhika Stavam

# राकिणीराधिकास्तवम्

## Document Information

Text title : Rakini Radhika Stavam

File name : rAkiNIrAdhikAstavam.itx

Category : devii, ShaTchakrashakti, devI

Location : doc_devii

Transliterated by : staff of Muktabodha.org Mark S.G. Dyczkowski

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : rudrayAmale uttaratantre 1 bhairava bhairavI sa.nvAde

Source : Rudrayamalam part 1 edited by Ram Prasad Tripathi and Sudhakar Malaviya

Acknowledge-Permission: Marjorie Woollacott, Ph.D., Digital Library Coordinator muktabodha.org

Latest update : February 16, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 16, 2020

*sanskritdocuments.org*

# राकिणीराधिकास्तवम्

आन्दोलिता रसनिधौ कुलचञ्चला या
मायामयो सकलदुःखविनाशवीरा ।
वीरासना स्थितिगता सुलभा मुनीनां
भव्या प्रपातु भविका कुलराकिणी माम् ॥ ४१-१८॥

आनन्दसिन्धु जडिताखिलसारपाना
बाला कुलीननमिता दलषड्कुलस्था ।
कालीकलामलगुणा धनिनां धनस्था ।
कृष्णेश्वरी समुदयं कुरु राकिणी मे ॥ ४१-१९॥

या राकिणी त्रिजगतामुदयाय चेष्टा
संज्ञामयी कुलवती कुलवल्लभस्था ।
विश्वेश्वरी स्मरहरप्रियकर्मनिष्ठा
कृष्णप्रिया मम सुखं परिपातु देवी ॥ ४१-२०॥

षड्वर्गनाथकरपद्मनिषेविता या
राधेश्वरी प्रियकरी सुरसुन्दरी सा ।
माता कुलेशजननी जगतां मनुस्था ।
विद्या परा रिपुहरावत मे शरीरम् ॥ ४१-२१॥

गोविन्दरामरमणी नवमालिनी या
राज्येश्वरी स्मरहरा नवकामिनी वा ।
मे षड्दलाश्रितसुरं परिपातु नित्यं
श्रीकुण्डली सुविमला कुलराकिणी सा ॥ ४१-२२॥

श्रीसुन्दरी कुलपरा कुलवृन्दवन्द्या
सन्ध्याविधि प्रभवतामतिकामतीर्था ।
श्रीदायिनी कुलगणामलभावदात्री
नित्यं प्रपातु विषयं कुलषड्दलानाम् ॥ ४१-२३॥

चैतन्यदाननिरतां त्रिगुणाभिरामां
श्यामां नितम्बधृतसुन्दररत्नघण्टाम् ।
नीलाचलस्थितकरां वरदानहस्तां
श्रीकृष्णवाम कमलोपरि पूजयामि ॥ ४१-२४॥

तां राकिणीं त्रिरमणीं समलापहन्त्रीं
सर्वस्थितां गगनमातरमम्बुजस्थाम् ।
पद्मासनां श्रुतिभुजां गुरुजामनन्तां
शान्तां षडम्बुजदलोपरि पूजयामि ॥ ४१-२५॥

शान्तिं कृपाकपटकोपरि नाशमुक्तिं
शिवां परमवैष्णवपूजिताङ्घ्रिम् ।
राधां सुधां वरमयीं जगतां गुणस्थां
धर्मार्णवां रसदले परिपूजयामि ॥ ४१-२६॥

कर्त्तीकरां सकरुणां रमणीं त्रिसर्गाम् ।
तां राकिणीमतिदयाममलार्थचिन्ताम् ।
भ्रान्तिं भ्रमागमवरां स्मृतिमादिपूज्याम् ।
भार्यां हरेरतिसुखां परिपूजयामि ॥ ४१-२७॥

या कातरं निरवधिप्रणयस्ववस्था
वागीश्वरी भगवती यतिकोटिनम्रा ।
ताम्राकृतिप्रकृतिचेतसि रक्तवर्णा
मायामयी सुरकलावति पातु मेऽङ्गम् ॥ ४१-२८॥

कल्पद्रुमाशयलता फलरूपिणी या
भर्गस्थिता पुरुषकोटिमुनिस्तुवन्ती ।
सा मे कुलेश्वररसं हरिहस्तपूज्या
क्षान्तिः सदा मम धनं परिपातु राधा ॥ ४१-२९॥

क्षेमङ्करी वरकरी सुकरी हरिस्था
या सौकरी भवकरी त्रिपुरा महेशी ।
वायुस्थिता लयमयी स्थितिमार्गसङ्गा
भङ्गपिरया सकलका परिपातु राधा ॥ ४१-३०॥

गङ्गा निर्मलभावदा ममशिरोदेशं सदा रक्षतु

श्रीराधा कुलराकिणी मम कपालोर्ध्वं महावाक्प्रिया ।
मन्त्रस्था जयदा मुदा कुमुदिनी भालं भ्रुवोरन्तरं
विद्या वाग्भवकुण्डलीफलवलाबाला च नेत्रत्रयम् ॥ ४१-३१ ॥

गण्डं चण्डसरस्वती श्रुतिकुलं कैलासशैलस्थिता
मेधा टं घटवासिनी शशीमुखी सूक्ष्मातिसूक्ष्माशया ।
जिह्वाग्रं चिबुकं रदावधिवहा कण्ठं गलं स्कन्धगं
स्कन्देशी दशनप्रभामलमति – वैकुण्ठधामेश्वरी ॥ ४१-३२ ॥

नानावर्णविलासिनी मृदुरसं शम्भोर्भवानी शिवा
पृष्ठं कर्मसु पृष्ठगा गतिकरी नित्योल्बणी भास्वती ।
पार्श्वं मे कुलमालिनी मम कटिं लिङ्गं नितम्बाम्बरं
कामाख्या धनदायिनी सकरुणा पादद्वयं पातु सा ॥ ४१-३३ ॥

मातृक्रोधनिवारिणी मम शिवं षट् पत्रशोभाकरं
पातु श्रीचरुवासिनी कुलतरुं गौरी परानन्ददा ।
चैतन्यस्थलवासिनी मम गता गोविन्दमातृप्रिया
चैतन्यं सततं प्रपातु धरणी धात्री वरक्षेत्रगा ॥ ४१-३४ ॥

धन्या पिङ्गललोचनाम्बुजमुखी चैतन्यकर्मप्रिया
सर्वत्र प्रियमाकरोतु नियतं शक्तिः क्षमाकर्तृका ।
कीर्तिस्था मम कीर्तिचक्रनिलयं लाक्षारुणा बल्वरी
नीचा चक्रनिवासिनी मम जया जीवं मुदा पातु माम् ॥ ४१-३५ ॥

एतत्स्तोत्रं पठेन्नित्यं प्राणवायुवराशुभे ।
षड्चक्रभेदसमये सदा पाठ्यं सुयोगिभिः ॥ ४१-३६ ॥

कुलविन्याससमये कुलचक्रप्रवेशने ।
अवश्यं प्रपठेद्विद्वान् राकिणीराधिकास्तवम् ॥ ४१-३७ ॥

त्रिसन्ध्यं चेदमाकुर्यात् पठित्वा च पुनः पुनः ।
ध्यात्वा भावपरो भूत्वा मुच्यते भवबन्धनात् ॥ ४१-३८ ॥

अचलां भक्तिमाप्नोति विश्वामित्रो यथा वशी ।
पठनात् पामरो याति ब्रह्मलोकं कुलाधिप ॥ ४१-३९ ॥

एतत्पठनमात्रेण शीतलो गुणवान् भवेत् ।
अप्रकाश्यमिदं स्तोत्रं सर्वान्तकविनाशनम् ॥ ४१-४० ॥

समभावं समाकृत्य जीवन्मुक्तो भवेद्वशी ।
पञ्चाचाररतो भूत्वा साधयेद् यदि साधनम् ॥ ४१-४१॥

कुण्डलीयोगकाले च कुलाचारं न वर्जयेत् ।
कुलाचारवर्जनेन महाहानिः प्रजायते ॥ ४१-४२॥

ब्राह्मणः क्षत्रियो वापि वैश्यो वा शूद्र एव च ।
समभावं सदा कृत्वा कुलाचारं समाश्रयेत् ॥ ४१-४३॥

कुण्डली पृथिवी देवी राकिणी स्वारिदेवता ।
तद्देहगामिनी देवी राधिका राज्यकामिनी ॥ ४१-४४॥

अस्याः साधनकाले च समयाचारमाश्रयेत् ।
समभावे महामोक्ष इति तन्त्रार्थनिर्णयः ॥ ४१-४५॥

समभावार्थकथनं त्यक्त्वा योगी भवेत्कृती ॥ ४१-४६॥

इति श्रीरुद्रयामले उत्तरतन्त्रे महातन्त्रोद्दीपने सिद्धिमन्त्रप्रकरणे
षट्चक्रप्रकाशे भैरवीभैरवसंवादे स्वाधिष्ठानराकिणीस्तोत्रं
नामैकचत्वारिंशत्तमः पटलः ॥ ४१॥

The numbers correspond to paTala and verse numbers from Rudrayamala uttaratantra.

Proofread by Aruna Narayanan

*Rakini Radhika Stavam*

pdf was typeset on February 16, 2020

Please send corrections to *sanskrit@cheerful.com*